संस्थान

मुकाम धवा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

# मुद्राप्रकार

॥श्री काशीविश्वनाथपुरीमें ढुंढिराजगणेशके पास रहाऊं अग्निहो।
त्रीके यहां सिद्धविनायकयंत्रमें मुद्राप्रकार छापा गया पुरविन छाप
नेवाले से लिखा विशेश्वर उपाध्या सं. १९२३ फा. सु. १० शुक्रवासरे.

(2)

मु०प्र० १

श्रीगणेशायनमः द्रुहिणहरिहराद्यैर्देववृन्दैर्नमस्यंददद्भिमतमर्थंभक्तिभाजांजनानाम् परिहृतसकलार्थैर्योगिभिर्ध्या
यमानंहरच[illegible]सरोजंक्षेमकामाभजध्वम् १ नत्वागुरुपदंरामकिशोरेणेष्टसिद्धिदम् साधकानांमुदेमुद्राप्रकाशोयंवि
रच्यते २ दे[illegible]मुदंहर्षंराति ददातीतिमुद्रा तयाचमंत्रदर्पणे रचनांसम्यग्ज्ञात्वापूजायांदर्शयेन्मुद्रां तदियंमुद्राकथि॰
तादेवेभ्योपन्मुदंराति मुदंरातीतिमुद्रास्यादित्यत्र कुलार्णवे मुदंकुर्वंतिदेवानांमनांसिद्रावयंतिच तस्मान्मुद्राइतिप्रो
क्तादर्शितव्याःकुलेश्वरि दर्शितव्याइतिदर्शयितव्याइत्यर्थः पूजाकालइतिशेषः पोर्लोपश्छांदसः गौतमीयेदशमाध्या
ये मोदनात्सर्वदेवानांद्रावणात्पापसंततेः मुद्रास्ताःकथिताःसद्यःदेवसान्निध्यदायिकाः यामले मोदनात्सर्वदेवानां।
द्रावणात्पापसंततेः तस्मान्मुद्रेयमाख्यातासर्वकामार्थसाधिनी मंत्रदर्पणे नादीक्षितस्तुरचयेत्तत्क्षुभ्यंतिहिदेवताय राम०
स्मात्तेमुद्राभवंतिविफलाःसोपिचरोगीदरिद्रःस्यात् अंकुशाख्याभवेन्मुद्रातीर्थावाहनकर्मणि उच्यतेलक्षणंतस्याय १
दुक्तंमंत्रदर्पणे तीर्थान्यावाहयेन्मंत्रीमुद्रयांकुशरूपया अंकुशाख्यादक्षमुष्टेरंकुशीकृततर्जनी ज्ञानार्णवेपिचतुर्थ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

पटले मुष्टिंबध्वादक्षकरेतर्ज्जन्यंकुशरूपिणी। अंकुशाख्याचमुद्रावैत्रैलोक्याकर्षिणीभवेत्‌ रक्षणेकुन्तमुद्रोक्तातस्यालक्षण
मुच्यते तंत्रसारे मुष्ट्यारूढांकृतांगुष्ठोतर्ज्जन्यग्रेतुविन्यसेत्‌ सर्वरक्षाकरीह्येषाकुंतमुद्राप्रकीर्त्तिताइति कुंभमुद्राभिषेकेस्या
त्तस्यालक्षणमुच्यते मंत्रदर्पणे वामांगुष्ठेदक्षांगुष्ठंक्षिप्त्वाह्यग्राभ्यांहस्ताभ्यांचेत्‌ मध्याकाशांमुष्टिंकुर्य्यात्कुंभाख्येयंमु द्राप्रोक्ता
मध्याकाशांमध्यशून्यां तत्रैवस्नानप्रकरणे दक्षांगुष्ठंवाममुष्टौतदन्यामुष्टिपार्श्वगाः कुर्य्यात्तामंतराकाशांकुम्भमुद्राभिषेच
ने तदन्याअंगुष्ठभिन्नादक्षांगुल्यः मुष्टिपार्श्वगाः वाममुष्टिपार्श्वगाः तांवाममुष्टिंअंतराकाशांमध्यशून्यां गौतमीयेसप्तमाध्याये॰
वामहस्तकृतांमुष्टिंदक्षहस्तेनवेष्टयेत्‌ कलशाख्याभवेन्मुद्रासर्वपापहराशुभा तंत्रांतरे दक्षांगुष्ठंपरांगुष्ठेक्षिप्त्वाहस्तद्वये
नच सावकाशांमुष्टिमेकांकुर्यात्साकुंभमुद्रिका परांगुष्ठेवामांगुष्ठे सावकाशांमध्यशून्यां कथितातत्त्वसंज्ञातुमुद्राबहुषुकर्म
सु स्यात्तुअंगुष्ठानामिकामेलनरूपा तथाचज्ञानार्णवे त्रयोदशपटले अंगुष्ठानामिकाभ्यांतुतत्त्वमुद्रेयमीरिताइति कालकर्णी
प्रयोक्तव्याविघ्नप्रशमकर्मणि उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे कृत्वोन्नतेचहस्तेमुष्ट्योःसंलग्नयोर्युगयोः तत्स्वभिवक्रेकु।

(3)

मु॰प्र॰ योहिघ्नघ्नीकालकर्णिकामुद्रा तथातंत्रसारेपि॰ अंगुष्ठावुन्नतौकृत्वामुष्ट्योःसंलग्नयोर्द्वयोः तावेवाभिमुखौकुर्यान्मुद्रैषा ॥
२ कालकर्णिका मुद्रा तवासुदेवाख्याध्यानेतल्लक्षणंयथा मंत्रदर्पणे अंजलिमुद्रांजलिवत्सैवस्याद्वासुदेवाख्या तथातंत्रांत
रे अंजल्यंजलिमुद्रास्याद्वासुदेवाह्वयाचसा अंजलीतिविभक्तिलोपश्छांदसः अथमातृकान्यासमुद्राः मंत्रदर्पणे मध्यानामे
स्तर्जेभालेवृद्धानामेचचक्षुषोः॥शीर्षेष्टकरपत्संधिपार्श्वेषुमध्यमामता वृद्धाश्रवणयोरुक्तासकनिष्ठान्वितानसोः गंडासेम
ध्यगास्तिस्रोऽनामिकादन्तजिह्वयोः पृष्ठेतिस्रःकनिष्ठाद्याःनाभौवृद्धान्वितास्तास्ताः जठरेकथिताःसर्वास्तलमुक्तंहृदादि
षु कथितामातृकामुद्रायाभिर्न्यासःफलप्रदः तंत्रांतरे ललाटेऽनामिकामध्येविन्यसेन्मुखवृत्तके तर्जनीमध्यमानामावृद्धा राम॰
नाभचनेत्रयोः अंगुष्ठंकर्णयोर्न्यस्यकनिष्ठांगुष्ठकौनसोः मध्यास्तिस्रोगंडयोश्चमध्यमांचोष्ठयोर्न्यसेत् अनामांदंतयोर्न्यस्य २
मध्यमांचोत्तमांगके मुखेनामांमध्यमांचहस्तेपादेचपार्श्वयोः कनिष्ठानामिकामध्यास्तास्तुपृष्ठेचविन्यसेत् ताःसांगुष्ठाना

(3A)

भिदेशेषेसर्वाःकुक्षौचविन्यसेत् हृदयेचतलंसर्वंअंसयोश्चककुत्स्थले हृत्पूर्वहस्तपत्कुक्षिमुखेषुतलमेवच एतास्तुमातृकामु
द्राःक्रमेणपरिकीर्तिताः अज्ञात्वाविन्यसेद्यस्तुन्यासःस्यात्तस्यनिष्फलः मुखेनानामामध्यमाभिस्तत्रमुखपदंजिह्वापरमितिपू
र्वेणाविरोधः अतएवव्योमेन्द्वोरसनार्णकर्णिकमित्यादौरसनापदेनविसर्गोगृह्यते इतिकिंचिदमात्रावधेयम् पार्श्वयोरित्य
स्यकनिष्ठानामिकामध्याद्रुस्तनेनैवसंबंधोनतुमध्यमाभिस्तेनेनतास्तुपृष्ठेचविन्यसेदित्यत्रतादृशस्यैवेयथ्योपत्तेः एवंचशी
र्षोष्टकरपत्संधिपार्श्वेषुमध्यमामतेतिमंत्रदर्पणकारेणयदुक्तंतच्चिंत्यम् अंगुल्यग्राणामनुक्तत्वाच्च मंत्रदर्पणकारोक्तं चिंत्य
मितिशेषः अथांगन्यासमुद्राः मंत्रदर्पणे हृन्नेत्रंत्रिभिरस्त्रंतद्द्वाभ्याम् स्वशिरोमतम् अंगुष्ठेनशिखाज्ञेयाद्विभिःकवच
मीरितम् द्विभिर्दशभिः तंत्रांतरे हृदयेमध्यमानामातर्जनीभिर्न्यसेद्बुधः मध्यमातर्जनीभ्यांचशिरसिन्यासमाचरेत्॰
अंगुष्ठेनशिखायांचदशभिःकवचेन्यसेत् नेत्रेषुतिसृभिश्चस्याद्स्त्रंमूर्ध्वाधोगंदिशः मध्यमातर्जनीभ्यांस्यादंगमुद्राःस्म
तादृमाः यामले॰ हृदयंमध्यमानामातर्जनीभिःस्मृतंशिरः मध्यमातर्जनीभ्यांस्यादंगुष्ठेनशिखास्मृता दशभिःकवचं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

पुम. प्रोक्तंतिसृभिर्नेत्रमीरितम् प्रोक्तांगुलिभ्यामस्त्रंस्यादंगल्कृतिरियंमता तिसृभिस्तर्जनीमध्यमानामाभिः तर्जनीमध्यमानामाः
३ प्रोक्तानेत्रत्रयेक्रमात् यदिनेत्रद्वयंप्रोक्तंतत्रतर्जनीमध्यमे द्वाभिमदृष्टध्नतवचनादितितंत्रसारकारः प्रोक्तांगुलिभ्यांमध्य।
मातर्जनीभ्यां अस्त्रमुद्रायांविशेषोयथा मंत्रदर्पणे दक्षस्यतर्जनीमध्येसव्येकरतलेक्षिपेत् अभिघातेनशब्दःस्यादस्त्र
मुद्रासमीरिताइति वेहलवतु॰विशेषोयथा मंत्रदर्पणे। हृदिशीर्षेनिरंगुष्टाश्चतस्रोदशवर्मणि सरलांगुष्ठमुष्टिस्तुशि
खायांस्यादधोमुखी ऊर्द्ध्वीभूतभुजद्वंद्वमुष्टंगुष्टप्रदेशिनी संभवध्वनिरस्त्रंस्याद्धिह्मोर्मुद्राचनेत्रयोः दक्षस्यतर्जनीम
ध्येनरसिंहेतरस्यतु तथातंत्रसारे अनंगुष्टाऋजवोहस्तशाखाभवेन्मुद्राहृदयेशीर्षकेच अधोंगुष्ठाखलुमुष्टिः शिखा
यांकरद्वंद्वांगुलयोवर्मणिस्युः नाराचमुष्ट्युद्धतबाहुयुग्मकांगुष्ठतर्जन्युदितोध्वनिस्तु विश्वग्विशत्काकथितास्त्रमुद्राय राम.
त्राक्षिणीतर्जनिमध्यमेच यत्राक्षिणीत्यनंतरंतत्रेत्यध्याहार्यम् तथाचायमर्थः यत्राक्षिणीनेत्रद्वयंतत्रनेत्रन्यासेतर्जं. ३
नीमध्यमेवेदितव्ये यत्रेतिनरसिंहेतरविष्णुमंत्रेइत्यर्थः नरसिंहस्यतुत्रिनेत्रत्वात्तन्नेत्रन्यासेतर्जन्यांगुलित्रयरूपाप्र

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(9A)

वीक्षैवमुद्राबोध्या अन्येतुसकलान्यासाः कर्त्तव्यास्तत्वमुद्रया तथाचगौतमीयेत्रतीयाध्याये मनसैवन्यसेन्न्यासानमु
द्रेणैवयथामुने अंगुष्ठानामिकाभ्यांवा अन्यथा विफलंभवेत् इति सौभाग्यदंडिनीमुद्रां रिपुजिह्वाग्रहां तथा श्री
विद्याविषयन्यासकालेसंदर्शयेत्सुधीः तथाचज्ञानार्णवेद्वादश पटले अथवक्ष्येमहेशानि श्रीविद्यान्याससुत्तमम्
संपूर्णांचिंतयेद्धिंचांब्रह्मरंध्रेरुणप्रभां स्रवत्सुधांषोडशार्णांमहासौभाग्यदांस्मरेत् वामांसदेशेसौभाग्यदंडिनीम्भ्रामयेत्ततः
रिपुजिह्वाग्रहांमुद्रांपादमूलेप्रविन्यसेत् ॥इत्युक्तान्यासजालमुक्तं एतयोर्लक्षणंउक्तंयथा मंत्रदर्पणे वामकरेणतुमुष्टींवध्वा
सरलांतुतर्जनींकृत्वा संभ्रामयेच्चवामकर्णेन्यासेसौभाग्यदंडिनीमुद्रा अंगुष्ठांतर्मुष्ट्यात्रैलोक्यंसन्निरुध्येव वामांघ्रितलेन्या
स्यासारिपुजिह्वाग्रहामुद्रा २ ज्ञानार्णवेपिद्वादशपटले० वामहस्तेनमुष्टिंतुबध्वाकर्णप्रदेशके तर्जनींसरलांकृत्वाभ्रामयेन्म
नुवित्तमः सौभाग्यदंडिनीमुद्रान्यासकालेतुसूचिता १ अंतरंगुष्ठमुष्ट्यातुनिरुध्यजगतीमिमां रिपुजिह्वाग्रहामुद्रान्यास
कालेतुसूचिता २ तंत्रांतरेतु रिपुजिह्वाग्रहांमुद्रांवामपादतलेन्यसेत् ॥इत्युत्तरार्द्धम्॥ मुद्राद्वयमिदंदक्षिणहस्तेनापिभव

(5)

मु॰प्र॰ तीतिमतम् तथाचतंत्रांतरे॰ अंगुष्ठांतर्दक्षमुष्टिर्वैरिजिह्वाग्रहा मता सरलातर्जनीसैवमुद्रासौभाग्यदंडिनी अन्यत्रापि दक्षु
४ मुष्टिंदृढंबध्वात्तर्जनींप्रविसारयेत् भ्रामयेद्वामकर्णाधोमुद्रासौभाग्यदंडिनी १ अंगुष्ठगर्भितांमुष्टिंबध्वादक्षिणपाणिना रिपु
जिह्वाग्रहामुद्रावामपादतलेन्यसेदिति अत्रैतामितिकर्मपदमध्याहार्य्यम् एतानिवचनानिश्रीविद्यान्यासप्रकरणे मंत्रदर्पण
कारध्रतानि १० कूर्ममुद्रासमाख्यातादेवताध्यानकर्मणि ॥ उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्पणे वामेपैत्रेतीर्थेतस्यांगुष्ठेचत
र्जन्यां दक्षस्याऽधोवदनमध्यानामेप्रदेशिनींस्वल्पां वामस्यामास्तिस्रोदक्षस्योर्ध्वाननाः पृष्ठे उन्नतदक्षांगुष्ठंकच्छपपृष्ठप्र
भंदक्षं पाणिंकृत्वाध्यायेत्कच्छपमुद्रासमाख्याता वामकरस्यतर्जन्यंगुष्ठमध्येदक्षिणकरस्याधोमुखेमध्यमानामिकेयोजयेत्
पुनस्तस्यवामस्यांगुष्ठेदक्षस्यमध्येप्रदेशिनींतर्जनींपुनर्वामस्यतर्जन्यांदक्षस्यस्वल्पांकनिष्ठां अन्याअवशिष्टास्तिस्रोमध्यमाना राम॰
माकनिष्ठाऊर्ध्वाग्रदक्षस्यपृष्ठेयोजयेत् पुनरुक्तंतंदक्षिणांगुष्ठंकृत्वादक्षपाणितलंकूर्मपृष्ठवत्कुर्य्यादित्यर्थः अन्यत्रापि॰ ४
वामहस्तस्यतर्जन्यांदक्षिणस्यकनिष्ठिकां तथादक्षिणतर्जन्यांवामांगुष्ठंनियोजयेत् उन्नतंदक्षिणांगुष्ठंवामस्यमध्यमादि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

काः अंगुलीर्योजयेत्पृष्ठे दक्षिणस्यकरस्यच वामस्यपितत्तीर्थेनमध्यमानामिकेतथा अधोमुखेचतेकुर्याद्दक्षिणस्यकर
स्यच कूर्मपृष्ठसमंकुर्याद्दक्षपाणिंचसर्वतः कूर्ममुद्रेयमाख्यातादेवताध्यानकर्मणि पृष्टेकोडेइतितंत्रसारकारः ११ त्रिखं
डात्रिपुराध्यानेतस्यालक्षणमुच्यते मंत्रदर्पणे पुटितौचकरौकुर्यात् दृढामध्याकनिष्ठिकाः सरलाःवद्धेचात्तर्जनीभ्यांपरिवर्त्या
नामिकेत्रिखंडेयम् वामकेश्वरतंत्रेच परिवर्त्यकरौस्पृष्टावंगुष्टौकारयेत्समौ अनामांतर्गतेकृत्वातर्जन्यौकुटिलाकृती क
निष्ठिकेनियुंजीतनिजस्थानेमहेश्वरि त्रिखंडेयंसमाख्यातात्रिपुराध्यानकर्मणि ज्ञानार्णवेपिद्वादशपटले पाणिद्वयंमहेशा
निपरिवर्तनयोगतः योजयित्वातर्जनीभ्यामनामेधारयेत्प्रिये मध्यमेयोजयेन्मध्येकनिष्टेतदधस्तथा अंगुष्ठावपिसंयोज्य
त्रिधायुग्माक्रमेणतु त्रिखंडानाममुद्रेयंत्रिपुरसंक्षोभकारिणीति १२ शिखयागालिनीमुद्रामर्घस्योपरिचालयेत् उच्यतेल
क्षणंतस्यायदुक्तंमंत्रदर्पणे पृष्टेपृष्टंदत्वांवध्वांगुष्ठौकनिष्ठाभ्याम् कुर्यादपराःसरलामुद्रेयंगालिनीकथिता अन्यत्रापिं
कनिष्ठांगुष्ठकौसक्तौकरयोरितरेतरम् तर्जनीमध्यमानामाःसंहत्ताभुग्नवर्जिता मुद्रैषागालिनीप्रोक्ताशंखतोयविशोधने॥

(6)

मु॰प्र॰ ५

तोत्तमीपेनवमाध्याये दशकृत्वोजयेन्मूलंगालिनींशिखयान्यसेत् करौप्रसार्यचान्योन्यंसंपुटक्रमयोगतः प्रयोज्यदक्षि
णांगुष्टंतथावामकनिष्ठया वामांगुष्टंदक्षिणयामुद्रेयंगालिनीमता अर्घ्यस्यफलदाप्रोक्ताशंखस्योपरिचालिता शिखयाव
षट्कारेणदक्षिणयादक्षिणकनिष्ठया १३ मत्स्याख्यामुद्रयात्वर्घ्यपात्रमाच्छादयेत्सुधीः उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्प
णे दक्षिणकरस्यपृष्ठेवामकरतलमथविन्यस्य सम्यक्चलितांगुष्ठौकुर्यान्मत्स्यस्वरूपिणींमुद्रां अन्यत्रापि दक्षपाणिपृ
ष्ठदेशेवामपाणितलंन्यसेत् अंगुष्ठौचालयेत्सम्यक्मुद्रेयंमत्स्यरूपिणी १४ मुद्रातुदेवताह्वानेनवप्रोक्तामनीषिभिः आ॰
वाहनीस्थापनीचतृतीयासन्निधापनी तुर्यासन्निरोधनीस्यात्संमुखीकरणीपरा सकलीकरणीषष्ठीसप्तमीत्ववगुंठनी या
मृतीकरणीप्रोक्ताधेनुमुद्रातुसाष्टमी परमीकरणीमुद्रानवमीपरिकीर्तिता क्रमेणलक्षणान्यासांप्रोक्तानिमंत्रदर्पणे उ राम॰
त्तानांजलिमूर्द्धनीत्वाथद्वावधःकुर्यात् आवाहनीमुदितात्वधोमुखीस्थापनीचसैवस्यात् द्वाविन्निद्वौवाराविसर्यः २ ५
आश्लिष्टमुष्टियुग्मस्योर्ध्वांगुष्ठेवसन्निधानेस्यात् अंगुष्ठगर्भिणीयंविख्यातासन्निरोधेहि ४ द्वावुत्तानौमुष्टीकृतावियंसं

मुखीकरणे ५ देवषडंगन्यासः सकलीकरणमिह संप्रोक्तम् ६ वामकरस्थिरचिताचेत्सरलाधोवदनतर्जनीमुष्टिः स्यादव
गुंठनमुद्रा सत्यभितोभ्रामिताकवचात् भ्रामिणेति घामावर्तक्रमेण कवचादिति कवचमुच्चार्येत्यर्थः कवचं हुं इति मुद्रेयं
करद्वयेनापिभवतीत्यग्रे गौतमीयवचनेत्तानार्णवीयवचनेनचस्फुटीभविष्यति ७ मिलिताभिथोभिवदनाऽनामास्वल्पा
प्रदेशिनीमध्या गोमुद्रेयं कथितावरुणेनतत्याम्रुतिकुर्यात् वरुणेनवरुणबीजेनवंइत्यनेन ८ ग्रथिताङ्गुष्ठोचमिथः
प्रसारिताःस्युःपरांगुल्यः परमीकुर्यादनयाकथिताकविभिर्महामुद्रा ९ गौतमीयेदशमाध्याये० ऊर्ध्वांजलिमधःकु
र्यादियमावाहनीभवेत् १ सेयंतुविपरीतास्यात्मुद्रास्थापनकर्मणि विपरीतेत्यधोमुखीत्यर्थः २ वाह्यांगुष्ठद्वयेमुष्टीमु
द्रास्यात्सन्निधापनी ३ अंगुष्ठगर्भिणीसैवमुद्रास्यात्सन्निरोधनी ४ उत्तानमुष्टियुगलासंमुखीकरणीमता ५ अन्यो
न्यतर्जनीसुग्मभ्रमणादवगुंठनी ६ अन्योन्यमिति अन्योन्याभिमुखगमनपूर्वकमित्यर्थः तथाचदक्षिणतर्जन्यादक्षिणा
वर्तेनवामतर्जन्यावामावर्तेनभ्रमणादवगुंठनीमुद्राभवतीतिफलितार्थः तत्रैव अंगुलीःसहिताः कृत्वाकरयोर्वामद

(7)

मु॰प्र॰ ६

त्वयोः दक्षानामासमायुक्तावामहस्तकनिष्ठिका वामानामासमायुक्तादक्षपाणिकनिष्ठिका दक्षस्यमध्यमाक्रांतावाम
हस्तस्यतर्जनी वाममध्यमयाक्रांतादक्षहस्तस्यतर्जनी संयुक्तौकारयेद्विद्वानंगुष्ठावुभयोरपि धेनुमुद्रानिगदितागोपितासा
धकोत्तमैः ७ ज्ञानार्णवेचतुर्थपटले॰ आवाहन्यादिमुद्रास्तुकथयामितवानघे ऊर्द्ध्वांजलिमधःकुर्यादियमावाहनीभवेत्
अत्रांजलिपदमनामामूलपर्वणोरंगुष्ठाग्रद्वयसंयोगयुक्तांजलिपरम् तंत्रसारधृतवक्ष्यमाणतंत्रांतरवचनैकवाक्यत्वा
त् एवंपूर्वोक्तवचनयोरपिबोध्यम् इयंतुविपरीतास्यात्तदावेस्थापनीभवेत् मिलितमुष्टियुगलंसन्निधापनरूपिणी ३
अंतरंगुष्ठमुष्टिभ्यांसन्निरोधनरूपिणी अत्रांतरंगुष्ठेत्युपादानाद्वचनांतरैकवाक्यत्वाच्चपूर्वमुद्रायांमुष्टियुगलस्यबा
ह्यांगुष्ठत्वमवगम्यतइत्यवधेयम् ४ एतस्याएवमुद्रायास्तर्जन्योःसरलेयदा अवगुंठनमुद्रेयंसर्वकार्यानुसाधनी तर्जन्योःस
रलेइतिकृत्वाऽभितोभ्राम्यतेइतिशेषोवचनांतरैकवाक्यात्वात् ५ अंगमंत्रान्न्यसेद्देविदेव्यंगेसाधकोत्तमः सकलीकरणं
नाममुद्रेयंव्याप्तिरूपिणी देव्यंगेइति अत्रदेवीपदमुपलक्षणम् ६ करावेकत्रसंयोज्यआरात्रिकविधौप्रिये परमीकरणं

राम॰ ६

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

नामंमुद्रेयंतुततःपरम् ॥ आरत्रिकमिवेतित्रिकोणवदित्यर्थः आरत्रिकविधावितिपाठेतुत्रिकोणाकारावित्यर्थः ७ परिवृत्य
करौपश्चात्तर्जनीमध्यमेयुते कनिष्ठानामिकांगुष्ठंपरस्परस्युतंकुरु ॥ धेनुमुद्रेयमाख्याताऽमृतीकरणंभवेत् ८ तंत्रसारे
हस्ताभ्यामंजलिंबध्वानामिकामूलपर्वणोः अंगुष्ठौनिक्षिपेत्सेयंमुद्रात्वावाहनीस्मृता १ अधोमुखीत्वियंचेत्स्यात्स्थापनीमु
द्रिकास्मृता २ उच्छ्रितांगुष्ठमुष्ट्योस्तुसंयोगात्सन्निधापनी ३ अंतःप्रवेशितांगुष्ठासैवसंरोधनीमता ४ उत्तानमुष्टियुग
लासन्मुखीकरणेस्मृता ५ देवतानांषडंगानांन्यासःस्यात्सकलीकृतिः ६ सव्यहस्तकृतामुष्टीदीर्घाधोमुखतर्जनी अव
गुंठनमुद्रेयमभितोभ्रामितामता ७ अन्योन्याभिमुखाश्लिष्टाकनिष्ठानामिकापुनः तथैवतर्जनीमध्याधेनुमुद्राप्रकीर्तिता
अमृतीकरणंकुर्यात्तयासाधकसत्तमः ८ अन्योन्यग्रथितांगुष्ठाप्रसारितपरांगुलीः महामुद्रेयमुदितापरमीकरणेबुधैः ।
९ प्रयोजयेदिमामुद्रांदेवताह्वानकर्मणि २३ लेलिहानामुद्रातुजीवन्यासेप्रकीर्तिता उच्यतेलक्षणंतस्यायदुक्तंमंत्रदर्प
णे स्युरधोवक्त्राःसुसमामध्यानामाप्रदेशिन्यः स्वल्पांसरलांकुर्याज्जिह्वांहृद्धामनामायाम् जीवन्यासेविहितासंप्रोक्तालेलिह

(8)

मु॰प्र॰ ७ मुद्रा स्वल्पांकनिष्ठां तंत्रसारे तर्जनीमध्यमानामाः समाः कुर्यादधोमुखाः अनामायां क्षिपेद्वृद्धामूर्ध्वीकृत्वा कनिष्ठिकां लेलि
हानाममुद्रेयं जीवन्यासे प्रकीर्तिता॰ २४ अथ गंधादिमुद्राः॰ तंत्रसारे॰ तंत्रांतरे॰ मध्यमानामिकांगुष्ठैरंगुल्यग्रेण पार्व
ति दद्याच्च विमलं गंधं मूलमंत्रेण साधकः १ अंगुष्ठतर्जनीभ्यां च पुष्पं चक्रे निवेदयेत् २ यथा गंधं तथा देवि धूपं दद्याद्वि
चक्षणैः मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत उन्मीलनं त्रिधा कृत्वा गायत्र्यामू
लयोगतः ३ तत्वाख्यमुद्रया देवि नैवेद्यं विनिवेदयेत् ४ मूलेनाचमनं दद्यात्तांबूलं तत्वमुद्रया ५ पुष्पदानमुद्रा ज्ञाना
र्णवेपि त्रयोदशपटले॰ पुष्पं समर्प्ययेद्देवि मुद्रयानया अंगुष्ठतर्जनीयोगात्ज्ञानमुद्रा प्रकीर्तिता २६ प्राणादिमु रा॰म॰ ७
द्रा नैवेद्यं दत्वा संदर्शयेत्सुधीः तासां स्वरूपं यथा कनिष्ठानामिके अंगुष्ठेन स्पृशेदिति प्राणमुद्रा १ अनामामध्यमे अं
गुष्ठेन स्पृशेदित्यपानमुद्रा २ मध्यमातर्जन्यावंगुष्ठेन स्पृशेदिति व्यानमुद्रा ३ तर्जनीमध्यमानामा अंगुष्ठेन स्पृशेदित्यु
दानमुद्रा ४ तर्जन्याद्यंगुलिचतुष्टयमंगुष्ठे स्पृशेदिति समानमुद्रा ५ तथा च मंत्रदर्पणे कालीपूजाप्रकरणे अंगुष्ठेन क

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

निष्ठादिपूर्वं पूर्ववियोगतः ॥ अनुलोमेन पुनश्चो विलोमात्रिचतुः स्पृशेत् बालाविलासतंत्रेपि कनिष्ठानामिकेऽनामामध्यमे मध्यमास्त
तर्जनीम् तर्जन्यादित्रयं तुर्यमंगुष्ठेन स्पृशेत्क्रमात् प्राणापानव्यानोदानसमानाख्येहिद्वांतिमाः ताराद्याः प्राणादिमंत्रा मुद्राः पूर्वोदि
ताः प्रिये ॥ ओंप्राणाय स्वाहेत्यादयः प्राणादिमंत्राः कनिष्ठानामिके इत्यादिना क्रमादिस्संतेनोक्ताः प्राणादिमुद्रा इत्यर्थः पूर्ववं
देवप्राणमुद्रा १ अथवा मध्यमातर्जन्यावंगुष्ठेन स्पृशेदित्यपानमुद्रा २ अनामामध्यमे अंगुष्ठेन स्पृशेदिति व्यानमुद्रा ३
उदानमुद्रा समानमुद्रापि च पूर्ववत् ४ तथाच मंत्रचिंतामणौ कनिष्ठानामिके मध्यातर्जन्यो वृद्ध्यास्पृशेत् अनामामध्यमे·
तिस्रस्तर्जन्याद्याश्चतस्रकाः इति प्राणादिमुद्रा वास्वतंत्रे तंत्रसंमताः तर्जन्याद्या इति काकाक्षिन्यायेनोभयत्र संबध्यते च त·
स्रका इति क्रकारस्तु क्तपूर्वस्यापि क्वचिद्गुरुत्वान्नात्र छंदोभंगः यथा॰ ॥ कस्त्वं खर्वद्विजोहं कुत इह न पत्तेर्दक्षिणार्थी मखे
स्मिन् स्वर्णं गां च गृहाण त्रिपदपरिमितां भूमिमभ्यर्थयामि तुभ्यं दत्तेति यावद्वदति बलिरसौ तावदेव त्रिपादे त्रैलोक्याक्रां
तमूर्तिः प्रहसितवदनो वामनः पातु युष्मान् क्रमदीपिकायां च स्पृशेत्कनिष्ठोपकनिष्ठिके हृत्स्वांगुष्ठमूर्द्ध्नि प्रथमे हृन्मुद्रा १ ॥

मु॰प्र॰ ८ तथापरातर्जनिमध्यमेस्यात् २ अनामिकामध्यमिकेचमध्या ३ अनामिकातर्जनिमध्यमाःस्या ४ तद्वच्चतुर्थीसकनिष्ठिकाऽ
स्ताः स्यात्पंचमीतद्वदितिप्रदिष्टाः ५ प्राणादिमुद्रानिजमंत्रयुक्ताः प्राणापानव्यानोदानसमानाः क्रमाच्चतुर्थ्यायुक्ताः तार
धाराः वध्वाचेष्टाः रुद्राध्वनस्तोमनवः ताराधाराःप्रणवाख्याः रुद्राध्वनोऽग्नेर्वध्वास्वाहयाढ्याःशोभिताः अंतेङितिशेषः
तथाच ॐ प्राणायस्वाहाइत्यादयः पंचप्राणादिमंत्रास्तानुच्चरन्क्रमेणप्राणादिमुद्रादर्शयेदिति यामलेन्यासमुद्रायुक्ता॰
अंगुल्यःकुटिलीभूताविरलाग्राःपरस्परम् न्यासमुद्रासमाख्यातासर्वपापौघनियोजिता प्राणोऽपानस्तृतीयस्तुव्यानश्चो ॥
दानएवच समानःपंचमेज्ञेयःप्राणाःपंचसमीरणाः अंगुष्ठेनसमायुक्ताकनिष्ठानामिकातथा प्राणमुद्रासमाख्याताप्राणा ८
हवनकर्मणि १ तर्जनीमध्यमांगुष्ठैस्त्रिभिरेकीकृतंयदि स्यादपानहुतौमुद्रा २ तथानामिकमध्यमा अंगुष्ठेनसमायुक्ता। रा॰ ८
नियुक्ताव्यानहोमके ३ निष्कनिष्ठेनयामुद्रासोदानहवनेस्मृता ४ सर्वाभिःसंस्मृतामुद्रासमानाहुतिकर्मणि ५ एतानिवच
नानिचतुर्दशोल्लासेशाक्तानंदतरंगिणिकारधृतानि रामकिशोररचितेग्रंथेमुद्राप्रकाशाख्येइतिसाधारणमुद्रानिर्णयआदि मुद्राप्र॰

(9A)

शिवविष्णुद्विनेशानांगणेशांविकयोरपि ॥ कथ्यंतेमुद्रिकास्तत्रदशमुद्राःशिवस्यतु लिंगयोनित्रिशूलाख्यामालेष्टाभीमृगाहु
या खट्वांगाख्याकपालाख्यातथाडमरुनामिका अथैतासांलक्षणानिनिगद्यंतेक्रमेणहि मंत्रदर्पणे उच्छ्रितदक्षांगुष्ठंवामां
गुष्ठेनबंधयेद्धीमान् वामांगुलीश्चपश्चाद्दक्षाभिर्बंधयेद्दृढं लिंगम् १ दत्ताभिरंगुलीभिःलिंगमितिलिंगमुद्रेत्यर्थः सन्मु
खौतुकरौकृत्वामध्यमापृष्ठसंस्थिते वक्राभ्यांतर्जनीभ्यांतुनिबध्नीयादनामिके कनिष्ठेहिनियुंजीतमध्यमाक्रोडदेशके क
निष्ठयोरग्रसंस्थावंगुष्ठौयोनिरीरिता २ तिस्रःप्रसारयेच्चैव दंगुष्ठेनचकनिष्ठिकांबध्वा एषात्रिशूलमुद्रादक्षिणहस्तस्थि
ताकथिता ३ तर्जन्यंगुष्ठाग्रेग्रथिते कृत्वाप्रसारयेदपराः तिस्रोंगुलीश्चमिलिताःकविभिःकथिताक्षमालेयम् ४ कुरुव
रदाभयमुद्रेवरदाभयवत्करौकृत्वा सरलाःसकलांगुल्योंगुष्ठंनिक्षिप्यतर्जनीमूले ६ मध्यनामाशिरसिहृद्धाशिखरंनियुंजीत
एषामृगमुद्रास्यादवशिष्टेसमुच्छ्रितेकुर्यात् ७ दक्षिणपंचांगुलयोमिलिताद्दृसमुन्नताःकार्याः खट्वांगाख्यामुद्राप्रियकृत्
प्रोक्ताशिवस्यापि ८ पात्रमिववामहस्तंकृत्वांगेवामकेन्यस्य कुर्यादुच्छ्रितवक्त्रे लकपालमुद्राभवेदेषा ९ दक्षिणमुष्टिंशि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

मु०प्र० थिलांकृत्वाकिंचिदुत्सुच्छ्रितांमध्यां संचालयेच्चकर्णेप्रभवतिखलुडमरुमुद्रेयम् १० तंत्रसारे उच्छ्रितंदक्षिणांगुष्ठंवामांगुष्टे।
९ नबंधयेत् वामांगुलीर्दक्षिणाभिरंगुलीभिश्चबंधयेत् लिंगमुद्रेयमाख्याताशिवसान्निध्यकारिणी १ मिथःकनिष्ठिकेबध्वा
तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः अंगुष्ठाग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता। २ अंगुष्ठेनकनिष्ठां
तुबध्वाश्लिष्टांगुलित्रयम् प्रसारयेत्त्रिशूलाख्यामुद्रैषापरिकीर्तिता ३ अंगुष्ठतर्जन्यग्रेतुग्रथितेस्थितांगुलित्रयम् प्रसारये।
दक्षमालामुद्रेयंपरिकीर्तिता ४ अधःस्थितोदक्षहस्तः प्रसृतोवरमुद्रिका ५ ऊर्ध्वीकृत्वोवामहस्तःप्रसृतोभय मुद्रिका
६ प्रसृतोनिकुब्जःपाणिर्निकुब्जःप्रसृत इत्यमरः मिलितानामिकांगुष्ठंमध्यमाग्रेनियोजयेत् श्लिष्टांगुल्फच्छिन्नेकुर्या
न्मृगमुद्रेयमीरिता श्लिष्टांगुल्युच्छ्रितेवृत्तिनात्रप्रकृतिर्ध्युदस्तात् ७ पंचांगुल्योदक्षिणास्तुमिलिताह्यर्ध्वमुन्नताः॥खट्वां एम०
गमुद्राविख्यातादेवस्यातिप्रियामता। देवस्यशिवस्य ८ पात्रवद्वामहस्तंतुकृत्वांगेवामकेतथा निधायोच्छ्रितवत्कुर्यान्मुद्रा- ९
कापालिकीमता ९ मुष्टिंचशिथिलांबध्वाईषदुच्छ्रितमध्यमां दक्षिणांतूर्ध्वमुन्नम्यकर्णदेशेप्रचालयेत् एषामुद्राडमरु

(10A)

कास्सर्वविघ्नविनाशिनी १० एतानिवचनानितंत्रसारकारधृतानि ध्यानात्पूर्वमिमामुद्राः पूजांतेवाप्रदर्शयेत् बोद्धव्यमेव
मन्यासुदेवतास्वपिसाधकैः तथाचमंत्रदर्पणे मुद्राःसंदर्श्यदिग्बंधंकृत्वाध्यायेज्जगत्प्रभुम् इति तंत्रसारकारेणापिसा
मान्यपूजाप्रवृत्तौ न्यासजालमुक्त्वाततस्तत्कल्पोक्तमुद्राःप्रदर्श्यध्यानंकृत्वामानसैसंपूज्य·शंखस्थापनंकुर्यादित्युक्तं
सनत्कुमारतंत्रेपि॰ पीठस्यार्चनमंगदेवयजनंप्राणप्रतिष्ठांततः आह्वानंनिजमुद्रिकाविरचनंध्यानंप्रभोःपूजनमिति॰
पंचायतनदीक्षाप्रकरणे तंत्रसारकारधृतमेतत् ज्ञानार्णवेपिद्वादशपटले न्यासजालमुक्त्वाप्राणानायम्यविधि
वन्मुद्रासन्नद्धविग्रहइत्यभिधाय क्षोभणद्रावणाकर्षवश्योन्मादमहांकुशाः खेचरीबीजयोन्याख्यानवमुद्राःस्त्वनु
क्रमात् इत्युपक्रम्यतत्तन्मुद्राउक्त्वा एवंविन्यस्तदेहः सन्मुद्रासन्नद्धविग्रहः ध्यात्वायोगविधिंकुर्यात्तेनसाक्षात् स्वयं
विभु रित्यभिधायद्वादशपटलमुसमाप्य त्रयोदशप्रटलेध्यानमुक्त्वाऽंतर्यागविधिरुक्तः पूजांतेमुद्राप्रदर्शनापितत्रै
वोक्ता तथाच सर्वोपचारैराराध्यमुद्राःसंदर्शयेत्क्रमादिति॰ ॥ गोतमीयेदशमाध्यायेपूजांते नवीननीरदश्यामं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com